प्रेद्ग्न इति (१९,२९ ) प्राङ् यात्वा यथार्थम्" १८सू०।
"गच्छेत्" क० । "आरोहेत् पार्श्वतो गच्छेत्"१९सू० ।
'यजमानः संस्कारात्"क० । "अह्ने खर्जत्यक्रन्ददग्निरिति
(११,३३( जपति" २०सू० । "खर्जनं च शब्दकर-
णम्" क० । 'वासेऽवहरत्युद्धतावोक्षितउत्तरतः स-
मिदाधानं प्र-प्रायमिति (१२,३४) २१सू० । "यत्र वास-
स्तत्रैवावहरणम् न प्रागवसतेः एवं ह्याह (६,८,१,१२)
स यदि पुरावसत्यै विमुञ्चेतानस्यैवाग्निः स्यादिति" वसत्यां
तु उत्तरतोऽग्नीनवतार्य समिदाधानं "प्र-प्रायमिति" ।
उद्धतावोक्षितग्रहणं च परिसमूहनाद्युपसंग्रहार्थमपि
स्मार्तं ह्येतदनूद्यते (६,४,४,१८) उद्धते वाऽ अवोक्षिते-
ऽग्निमादधातीति" एवं च सति तदपचारे स्मार्तं प्राय-
श्चित्तम्"क० । "वासार्थे रथे उत्तरस्यां दिशि अग्निमव-
तारयति" संग्र० । "वनीवाहनमेतद्दीक्षासु यदेच्छेत्"
२२सू० । "वनीवाहनमिति" संज्ञास्य कर्मणः सा च सं-
व्यवहारार्था "ऊर्द्ध्वं वनीवाहनादिति" ( २५सू० )
तच्च दीक्षासु कर्तव्यम् । यदेच्छोपजायते महावीरकरण-
यूपच्छेदनवनीवाहनानि दीक्षासु क्रियन्ते क्रमस्तु नैषाम्
पाठाभावात्" क० "अप्सूख्यभस्मावपनं क्रयणीयादौ"
२३सू० । उख्यभस्मावपनमप्सु कर्तव्यम् आदौ क्रयणीय-
स्याह्नः"क०। "अन्यत्र चेच्छन्"२४सू०। "करोति"क०।
'ऊर्ध्वं वनीवाहनात् क्रमयोगात्" २५सू० । अन्यत्रे-
च्छया कुर्वन् वनीवाहनादूर्ध्वं करोति मन्त्राणां पाठक्रम-
योगात्" क० । "वनीवाहनादूर्ध्वं सोमक्रयदिने आदौ
अन्यत्र दीक्षा भस्मावपनम् । कुतः क्रमयोगात्
पूर्वं वनीवाहनमन्त्राः पश्चाद्भस्मापोऽभ्यहरणस्य" संग्र०
'पलाशपुटेनापो देवीरित्येकया ( १२,३५ ) २६सू० ।
"पलाशपुटेन भस्म गृहीत्वाप्स्वावपति"क० । "ततो द्वाभ्या-
म्" (१२,३६-३७) २७सू० । "पुनश्चावपति द्वाभ्या-
मृग्भ्याम्"क० । "आद्याभ्यां (१२,३५-३६) वा पूर्वम्"
२८सू०। "पूर्वमावपनं द्वाभ्यामृग्भ्याम् तत एकयर्चा"
वाशब्दो विकल्पार्थः तुल्यश्रुतित्वात्" क०। "अनामिकया
प्रास्तादादत्ते प्रसद्येति (१२,३८-४१) २९सू०। "प्रास्ता-
द्भस्मनः कियदप्यनामिकयादत्ते" (६,८,२,७) । 'प्रास्तो-
खामुपतिष्ठते बोधा मइति" (१२,४२) ३०सू०। 'यत्त-
दात्तं भस्म तत्रास्य" क० । "प्रायश्चित्तिं समिधोप-
हृत्य" ३१सू० । ६कण्डिका ।
'आज्यं विश्वकर्मणइति ( १२,४३ ) जुहोति" १सू० ।

"प्रायश्चित्तिरित्यस्य होमस्य संज्ञा उपपूर्वश्च हन्तिर्ग्रह-
णार्थो दृष्टोऽन्यत्रापि "अथ स्रुचोपहत्याज्यमिति (२,४,
१,२५ )" क० । "समिधा करणभूतया स्रुक्स्थानीयया
उपहत्य गृहीत्वा" संग्र० । "उत्थाय दधाति समिधं
पुनस्त्वेति ( १२,४४ ) २ सू० । उत्थानग्रहणं च प्रति-
पत्तित्वात् गुणार्थं चेति । नैमित्तिकान्यत्रैव प्रकरणे पठ्यन्ते
तदर्थमाह" क० "गार्हपत्येऽनुगते निर्मथ्य" ३ सू० ।
"आदधाति मन्थनं प्राप्तत्वादवाच्यम् उच्यते प्रायश्चित्ता-
र्थम्" । "प्राजहिते उपशान्ते मथित्वा प्रायश्चित्ती करोति"
संग्र० । "सुत्यावाहनीये सांकाशिनेन हृत्वा:"
४सू०। "सुत्यासु वर्तमानासु आहवनीयेऽनुगते सांकाशिनेन
हृत्वा तमादधाति" सांकाशिनशब्दः प्रगुणमेव हृत्वेत्यर्थकः
एतच्चोच्यते पूर्ववत्प्रणयनं मा भूदिति" क०। "आहवनीये
ऽतिप्रणीतेऽनुगते सांकाशिनेन हृत्वा ऋजुना सदोहवि-
र्धानमध्यमार्गेणैव हृत्वा" संग्र० । "आग्नीध्रीयमुत्तरेण
सदः" ५सू० । "हृत्वा निदधाति उत्तरेण सदो हृत्वे-
तीध्मव्युदासार्थः" क० । आग्निध्रीयमग्निमनुगतं सदस
उत्तरेणैव हृत्वा" संग्र०। "प्रवृञ्ज्यादावृतोखेऽ" ६सू०।
"उख्ये चानुगते पूर्ववत्प्रवृञ्ज्यात् अयं तु विशेषः आवृता
आवृद्ग्रहणं च मन्त्रनिवृत्त्यर्थम् । "एतयैवावृतानुपहरन्
यजुरिति ( ६,६,४,९) श्रुतेः"क० । "उख्येऽग्नावनुगते
गार्हपत्यादाहवनीयमन्वग्निरित्याहृत्य (११,१७ समितमित्यु-
पस्थाय (१२,५७ आवृता मन्त्ररहितक्रियामात्रेण पूर्व-
वदुखां प्रवृञ्ज्यात् उखामाहवनीयेऽधिश्रित्योख्यमग्नि-
मुत्पादयेत्" संग्र० । "अध्वरप्रायश्चित्तिं च सर्वेषु
यथाकालं पूर्वां-पूर्वाम्"७सू० । "अध्वरप्रायश्चित्तिं च
करोति सर्वेषु निमित्तेषु तां च पूर्वाम् पूर्वां चशब्दा-
दाग्निकीं च । सर्वग्रहणं च भस्मापोऽभ्यवहरणार्थम् ।
(२३) तत्रापि हि विधीयेते (६,८,२,११) उभे प्राय-
श्चित्ती "करोतिये एवाग्नावनुगते इति" यथाकालमिति
चाध्वरप्रायश्चित्त्यर्थमुच्यते आग्निकी तु विश्वकर्मण-
इत्येव" क० "सर्वेषु पूर्वोक्तेष्वग्न्यनुगमेषु यथाकालं
परमेष्ठ्यादिकालाहुतिं (२६,६,१ ) पूर्वां पूर्वां जुहुयात्
पश्चादग्निप्रायश्चित्तिम् चकारात्" संग्र० "उखाभेदने नव-
स्थाल्यां महासुख्यामुखाकपालमवधायावपति" ८सू० ।
यद्येषोखाभिद्येतेति" (६,६,४,८) प्रकृत्य सर्वमिदमाम्ना-
तम् एतच्चैकोखापक्षे भवति । त्रित्वपक्षे तु द्वयोरेवैकस्या-
मावपनम्"(६,५,२,२२)क०।"उखोपशये पिष्टा मृदा स-